# Gopala Divya Sahasranama Stotram

# ગોપાલદિવ્યસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : Gopala Divya Sahasranama Stotram

File name : gopAladivyasahasranAmastotram.itx

Category : vishhnu, sahasranAma, stotra, krishna, vishnu

Location : doc_vishhnu

Proofread by : Manish Gavkar, Rajani Arjun Shankar

Description/comments : See corresponding nAmAvalI

Latest update : March 23, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 23, 2024

*sanskritdocuments.org*

# ગોપાલદિવ્યસહસ્રનામસ્તોત્રમ્

The puruShottamakavacham should be recited
before the sahasranAmastotram

અથ શ્રીગોપાલદિવ્યસહસ્રનામસ્તોત્રમન્ત્રસ્ય સવિતા ઋષિઃ,
શ્રીરાધિકાધિપતિર્ગોપાલો દેવતા, અનુષ્ટુપ્ છન્દઃ, ભક્તિર્બીજં,
લીલાશક્તિર્લોકદ્વયવાસનાનિરસનપૂર્વકશ્રીકૃષ્ણશુદ્ધભક્તિલબ્ધયે
વિનિયોગઃ ।
સવિત્રે નમઃ શિરસિ । શ્રીરાધિકેશાય નમો હૃદિ ।
અનુષ્ટુપ્છન્દસે નમો મુખે । ભક્તિપ્રિયાય નમો નાભૌ ।
શ્રીકૃષ્ણભક્તયે નમઃ સર્વાઙ્ગે ।
મૂલેનાપિ ગાયત્ર્યા વા ન્યાસાન્ કુર્યાત્રિધા પુનઃ ।
તતઃ સ્વાભિમતો ધ્યાનં કુર્યાત્કાર્યેષુ દીક્ષિતો ॥ ૧॥

પ્રોત્ફુલ્લેન્દીવરાભઃ કમલદલસુદૃગ્ દિવ્યનીલેન્દ્રકાયઃ
બિભ્રત્સમૃલ્લકચ્છો વરપટયુગલં ચારુમાયૂરપિચ્છમ્ ।
મુક્તામાણિક્યહીરાદ્યતુલમણિકૃતૈર્મણ્ડનૈર્મણ્ડિતાઙ્ગો
ભક્તાન્ વેણોર્નિનાદૈઃ સુખયતિ જયતાદ્ ગોકુલેન્દુર્મુકુન્દઃ ॥ ૨॥

ૐ શ્રીકૃષ્ણઃ સચ્ચિદાનન્દો ગોવિન્દો ગોકુલેશ્વરઃ ।
પૂર્ણાનન્દો નિજાનન્દો નિર્ગુણો નિરપાશ્રયઃ ॥ ૩॥

લીલાશક્તિઃ સ્વતન્ત્રાત્મા સદાનન્દોઽતિસુન્દરઃ ।
તેજોમયો દ્યુતિધરઃ લીલાશક્તિપ્રવર્ત્તકઃ ॥ ૪॥

વામાંશાનન્દનો નન્દો ગોવિન્દો ગોકુલેશ્વરઃ ।
પ્રેમરૂપઃ પ્રમેયાત્મા પ્રમાણં ફલભૃત્ ફલમ્ ॥ ૫॥

રાસલીલારસાસ્વાદો નિત્યાખણ્ડમહોદયઃ ।
અચિન્ત્યકાર્યકરણો હ્યપ્રાકૃતગુણાલયઃ ॥ ૬॥

ઈશ્વરો નિત્યલીલશ્ચ શુદ્ધાદ્વૈતો નિરાશ્રયઃ ।
નિત્યાનન્દો મહાનન્દો સર્વાનન્દો પરાત્પરઃ ॥ ૭॥

જ્ઞાનશક્તિઃ ક્રિયાશક્તિરિચ્છાશક્તિઃ સ્વયંપ્રભુઃ ।
માયારૂપઃ કાલરૂપઃ કર્મરૂપઃ સ્વભાવકૃત્ ॥ ૮॥

સત્ત્વરજસ્તમઃસામ્યમૂલપ્રકૃતિરવ્યયઃ ।
ગુણક્ષોભો બાલલીલો મહત્તત્ત્વં હિરણ્મયઃ ॥ ૯॥

વિજ્ઞાનં ચિત્તનિલયઃ સત્ત્વમૂર્તિરમૂર્ત્તિકઃ ।
હિરણ્યગર્ભો લોકેશો વિશ્વલોકો વિરાટ્ પ્રભુઃ ॥ ૧૦॥

પ્રદ્યુમ્નઃ સૃષ્ટિકર્ત્તા ચ વિકર્ત્તા વિકૃતોઽકૃતઃ ।
આવિર્ભૂતસ્તિરોભૂતો નિત્યાખણ્ડસમાધિગઃ ॥ ૧૧॥

અહઙ્કારોઽપ્યહમ્ભાસસ્તૈજસસ્ત્રિગુણાત્મકઃ ।
સઙ્કર્ષણસ્તમોરૂપો રુદ્રોઽનનુભૂતિકૃત્ ॥ ૧૨॥

ભૂતાદિસ્તામસઃ ક્ષુબ્ધો જડોઽવ્યક્તઃ પ્રપઞ્ચકૃત્ ।
શબ્દૈરબોધનિસ્ફોટો નાદો બિન્દુઃ કલા બલી ॥ ૧૩॥

કુણ્ડલી પ્રણવો વ્યક્તો ઘણ્ટાનાદો મહોદરઃ ।
સ્વરઃ સ્પર્શસ્તથોષ્મા ચ અન્તસ્થો બિન્દુસર્ગકઃ ॥ ૧૪॥

ઉદાત્તઃ પ્રચયો દીર્ઘોઽનુદાત્તઃ સ્વરિતઃ પ્લુતઃ ।
વિસર્ગાત્મા યમો નાનાવર્ણરૂપો વિકારભૃત્ ॥ ૧૫॥

ધાતુઃ પ્રકૃતિરાદ્યશ્ચારૂઢોઽર્થઃ પ્રત્યયોઽત્યયઃ ।
યૌગિકઃ શક્તિભૃલ્લક્ષ્યો વ્યઞ્જકોઽર્થપદોઽપદઃ ॥ ૧૬॥

સમસ્તવાક્યરૂપશ્ચ ઋગ્યજુઃસામગો લયઃ ।
રાગશ્ચ સંહિતા સન્ધિર્બ્રાહ્મણોપનિષન્મયઃ ॥ ૧૭॥

આકાશો નિર્મલઃ શુદ્ધો બ્રહ્મલિઙ્ગશ્ચ જીવનઃ ।
સ્પર્શો મૃદુસ્તથા તીક્ષ્ણ ઉષ્ણોઽનુષ્ણઃ સદાગતિઃ ॥ ૧૮॥

રૂપં પ્રકાશગ્રહણસ્તેજઃ પરિણતિપ્રિયઃ ।
રસં રસ્યં જનં તૃપ્તિર્મહીયાન્ સુરભિઃ શુચિઃ ॥ ૧૯॥

ભૂમિભૂતાશ્રયઃ સર્વગુણાધ્યક્ષો મહત્તરઃ ।
ઉદ્ભિજ્જઃ સ્વેદજશ્ચાણ્ડભવોઽપિ ચ જરાયુજઃ ॥ ૨૦॥

દ્વેષજઃ કાલજો જોષ્ટા જન્યશ્ચાપિ મનોભવઃ ।
જીવશ્ચેતનયુગ્વ્યાપી મનોબુદ્ધિરહં ત્વસૌ  ॥ ૨૧॥

પરમાત્મા હૃષીકેશો યોગગમ્યઃ સનાતનઃ ।
તૈજસો વિષયી વેત્તા કરણં કારણઃ ક્રમઃ ॥ ૨૨॥

મુખ્યો બાહ્યેન્દ્રિયાગ્રાહ્યઃ ક્રિયાશક્તિઃ કૃતક્રમઃ ।
દિગ્વાતોઽર્કઃ પ્રચેતોઽશ્વી વહ્નિરિન્દ્રો હરિર્ગુરુઃ ॥ ૨૩॥

મિત્રો નિરૃતિપો રુદ્રો ગિરીશો ગિરિરીશ્વરઃ ।
સમુદ્રશ્ચૌષધીપ્રીતિધરઃ સઙ્કલ્પજીવનઃ ॥ ૨૪॥

દેવોઽદેવશ્ચ મનુજો મુનિર્મુક્તો મહેશ્વરઃ ।
ક્ષીરાબ્ધિશયનો લક્ષ્મીપતિઃ શેષકૃતાશ્રયઃ ॥ ૨૫॥

દેવેશઃ સત્યસઙ્કલ્પ આદિર્નારાયણોઽપિ ચ ।
બ્રહ્મા રજોગુણાધ્યક્ષો લોકઃ પદ્મસમુદ્ભવઃ ॥ ૨૬॥

અજ્ઞો વિજ્ઞોઽનુગ્રહીતા ચતુર્વક્ત્રો તથોર્જિતઃ ।
યોગીશ્વરો વિષ્ણુસખો વેદગર્ભો વિધાનકૃત્ ॥ ૨૭॥

અવિદ્યા સૃષ્ટિકૃદ્વિદ્યા પ્રભવઃ સનકઃ સનાત્ ।
સનન્દનઃ કુમારશ્ચ પ્રતિસર્ગોપસર્ગકૃત્ ॥ ૨૮॥

વિસર્ગલીલઃ સઙ્ક્રુદ્ધો રુદ્રો રુદ્રકરઃ પ્રભુઃ ।
એકાદશાત્મા કાલેશ ઉમેશો ગિરિશો મૃડઃ ॥ ૨૯॥

મરીચિરત્રિઃ પુલહઃ પુલસ્ત્યઃ ક્રતુરૂર્જિતઃ ।
દક્ષો વસિષ્ઠોઽપિ ભૃગુરથર્વાઙ્ગિરસામ્પતિઃ ॥ ૩૦॥

ગૌતમો નારદોઽગસ્ત્યઃ કર્દમો લોમશોઽરુણઃ ।
ઋષિસર્ગો વિસર્ગાત્મા દેવસર્ગો સુરાર્દનઃ ॥ ૩૧॥

જલજઃ સ્થલજો વ્યોમભવઃ પુણ્યવિમિશ્રજઃ ।
સ્વાયમ્ભુવો મનુર્ધીમાન્ શતરૂપાપતિઃ શુચિઃ ॥ ૩૨॥

આદિરાજો મહારાજો જગત્ત્રાણપરાયણઃ ।
મનુષ્યસૃષ્ટિકૃત્ કર્ત્તા કૃતકૃત્યઃ કૃતાત્મભૂઃ ॥ ૩૩॥

આકૂતિદેવહૂતિપ્રસૂતિજઠરોદ્ભવઃ ।

પ્રિયવ્રતઃ સત્યવ્રતો લોકાતીતો મહોદયઃ ॥ ૩૪॥

સીમાવિભાગકૃત્સપ્તસિન્ધુનેમી મહાબલી ।
મર્યાદાસૃષ્ટિકૃદ્વિશ્વજનરક્ષાપરાયણઃ ॥ ૩૫॥

પુરુષો વિશ્વરૂપશ્ચ સહસ્રાસ્યઃ સહસ્રપાત્ ।
સહસ્રબાહુઃ સર્વત્ર સર્વં સર્વાદિરચ્યુતઃ ॥ ૩૬॥

સર્વેન્દ્રિયગુણાભાસઃ સર્વતોઽક્ષિશિરોમુખઃ ।
સર્વતઃ શ્રુતિમલ્લોકે સર્વસાક્ષી જનાર્દનઃ ॥ ૩૭॥

સૂર્યકોટિપ્રતીકાશો વાયુકોટિમહાબલઃ ।
સમુદ્રકોટિગમ્ભીરો મેરુકોટિમહાચલઃ ॥ ૩૮॥

કલ્પદ્રુકોટિફલદઃ કામધુક્કોટિપૂજિતઃ ।
કોટિચિન્તામણિસ્થાનશ્ચન્દ્રકોટિસુરઞ્જનઃ ॥ ૩૯॥

સુધાકોટિમહાનન્દઃ કોટિમન્મથસુન્દરઃ ।
કોટીન્દિરાસેવિતાઙ્ઘ્રિઃ કોટિબ્રહ્માણ્ડવિગ્રહઃ ॥ ૪૦॥

વેદકોટિપ્રગીતશ્રીર્યોગકોટિધૃતાશયઃ ।
ભક્તકોટિવ્રતઃ શ્રીમાન્ કોટિધૈશ્વર્યમઙ્ગલઃ ॥ ૪૧॥

અનન્તોઽનન્તશીર્ષેશો નાગરાજસમર્ચિતઃ ।
નીલામ્બરો હલધરઃ શોણાક્ષશ્ચૈકકુણ્ડલી ॥ ૪૨॥

નાગકન્યાકૃતાભ્યર્ચ્યઃ સનકાદિસમર્ચિતઃ ।
વિદ્યાપ્રવર્તકો ભક્તનન્દનોઽસુરનન્દનઃ ॥ ૪૩॥

શ્રીશઙ્કરાર્ચિતો ભવ્ય ઇલાવૃતકૃતાલયઃ ।
જમ્બુદ્વીપપતિઃ પૂજ્યો જગદીશો જગત્પતિઃ ॥ ૪૪॥

વિષ્ણુર્વૃષાકપિર્મેરુશૈલાધીશો ગુહાશયઃ ।
રમ્યકેશો હિરણ્યેશઃ કુરુનાથો ધરાપતિઃ ॥ ૪૫॥

હરિવર્ષપતી રામઃ કિન્નરાધીશ્વરોઽપિ ચ ।
કેતુમાલવિહારી ચ ભદ્રાશ્વકૃતકેતનઃ ॥ ૪૬॥

ભારતાધિપતિઃ કૃષ્ણો નરો નારાયણો ગુરુઃ ।
વદ્રીભક્તાત્મકો ભવ્યો લોકાનાં હિતકારકઃ ॥ ૪૭॥

જગન્નાથો જગજ્જીવઃ પાવનઃ પુરુષોત્તમઃ ।
શ્રીરઙ્ગનાયકઃ પદ્મનાભોઽનન્તો જનાર્દનઃ ॥ ૪૮॥

દક્ષિણાશાપ્રિયકરો ધનુસ્તીર્થો રઘુપ્રિયઃ ।
ધવઃ કાન્તઃ પતિર્ભર્તા સ્વામીશો ઠાકુરાઽધિપઃ ॥ ૪૯॥

ભીમાપતિર્ભીમસુતાનાથઃ શ્રીવિઠ્ઠલેશ્વરઃ ।
દીનોદ્ધારી કૃપાકારી વેઙ્કટેશો હિમપ્રિયઃ ॥ ૫૦॥

ચતુર્ભદ્રાપ્રિયસ્તુઙ્ગો ભદ્રેશઃ કૃષ્ણભૂપતિઃ ।
શૃગાલહા શૃઙ્ગધરો શૃઙ્ગાધીશશ્ચ મઙ્ગલઃ ॥ ૫૧॥

વિષ્ણુર્વિષ્ણુપ્રિયાચાર્યો ચમ્પારણ્યકૃતોદયઃ ।
દુર્વાદખણ્ડનો રુદ્રઃ સમુદ્રઃ સર્વવિજ્જયી ॥ ૫૨॥

લોકાજ્ઞાનહરો દક્ષઃ શિખી મુણ્ડી ચ દણ્ડભૃત્ ।
શેષોઽશેષધરો વિદ્યાધરઃ શોકહરઃ પરઃ ॥ ૫૩॥

માધવો માપતિર્જીવો જીવનોઽમૃતદોઽમરઃ ।
વૈશ્વાનરો બ્રહ્મવેત્તા સુધાનાથો હરિપ્રિયઃ ॥ ૫૪॥

કુમારો મુક્તિદો મુક્તો જનેશો વિશ્વવન્દિતઃ ।
દ્વારાપતિઃ શઙ્ખધરઃ કુશેશઃ શ્રીત્રિવિક્રમઃ ॥ ૫૫॥

રણત્યાગી રણહરો ઋણહા સિદ્ધસેવિતઃ ।
સોમનાથઃ પ્રભાસેશઃ જ્વાલામાલી દિગમ્બરઃ ॥ ૫૬॥

હિમાલયઃ પશુપતિઃ કેદારો દારવલ્લભઃ ।
ભૂપતિર્ભૂધરઃ સિન્ધુઃ સરિદ્રૂપો વનોઽવનિઃ ॥ ૫૭॥

જમ્બૂનારાયણો મેરુશિખરાનન્દવર્ધ નઃ ।
રત્નાકરો રત્નભોક્તા પ્લક્ષો પ્લક્ષાધિપો રવિઃ ॥ ૫૮॥

જગદાત્મા જગચ્ચક્ષુસ્તપનઃ સવિતા ઘૃણિઃ ।
ઇક્ષુસિન્ધુઃ શાલ્મલીશશ્ચન્દ્રઃ સુરપિતૃપ્રિયઃ ॥ ૫૯॥

વિશ્વાનન્દકરઃ કાલઃ સુરાસમ્મોહિતોઽસુરઃ ।
કુશપ્રિયઃ કુશાધ્યક્ષો હુતભુગ્ ઘૃતભોજનઃ ॥ ૬૦॥

ક્રૌઞ્ચપ્રિયો ભક્તમયો ક્ષીરસાગરવલ્લભઃ ।
શાકઃ શાકપ્રિયઃ પ્રાણો દધિભુક્ દેવસંયુતઃ ॥ ૬૧॥

પુષ્કરઃ પુષ્કરપતિર્વિરિઞ્ચિર્મધુરો મધુઃ ।
માનસો માનસગતિઃ કાઞ્ચની મુકુરપ્રિયઃ ॥ ૬૨॥

લોકાલોકો  મહાસ્થાનો ગોમ્પ્રા દિગ્ગજનાયકઃ ।
સ્વર્ગો મહર્જનો દિવ્યસ્તપઃ સત્યં ધ્રુવો વ્રતમ્ ॥ ૬૩॥

વૈકુણ્ઠો દેવલોકશ્ચ ગોલોકો બ્રહ્મભૂ રસઃ ।
અતલો મયપુત્રેષ્ટઃ છલોઽથ વિતલો હરઃ ॥ ૬૪॥

સુતલો ભક્તવશ્યશ્ચ વિક્રમી બલિપૂજિતઃ ।
મહાતલો મહામાયી કાદ્રવેયાશનાસનઃ ॥ ૬૫॥

રસાતલો દાનવાન્તકરણઃ સુરવલ્લભઃ ।
ત્રિલોકીધરણઃ શેષઃ નાગેશો જ્ઞાનસાગરઃ ॥ ૬૬॥

નાનાકર્મગતિઃ પાપગતિદુર્ગતિદો યમઃ ।
અનન્તનરકચ્છેદી પવિત્રં વરસદ્યશઃ ॥ ૬૭॥

કોટ્યશ્વમેધપાપઘ્નઃ કોટિતીર્થાતિપાવનઃ ।
કોટિવિશ્વસમુદ્ધર્ત્તા કોટિસાધનસાધનઃ ॥ ૬૮॥

નિજાઽનુગ્રહવલ્લીલ ઈશ્વરોઽચિન્ત્યકાર્યકૃત્ ।
સત્પ્રસાદસમુદ્ધારઃ સતઃ સદ્વાસનાપ્રદઃ ॥ ૬૯॥

અસદ્ધીહરણઃ સર્વવ્યાપી સદ્ધર્મસદ્ગતિઃ ।
સદ્ધર્મપાલકઃ સત્યમનુરૂપી જનેશ્વરઃ ॥ ૭૦॥

વરાહો યજ્ઞરૂપશ્ચ ધરોદ્ધારી ધરાસ્તુતઃ ।
હયશીર્ષો હયગ્રીવઃ સર્વવિદ્યાપ્રવર્ત્તકઃ ॥ ૭૧॥

દત્તાત્રેયો મહાયોગી નારદો દેવપૂજિતઃ ।
કુમારઃ કપિલાચાર્યઃ સાઙ્ખ્યવિત્સાગરો ધૃતિઃ ॥ ૭૨॥

ધર્મસૂનુર્ધર્મરૂપઃ સ્વધર્મપરિપાલકઃ ।
યજ્ઞઃ સુરગણાધીશો મેરુદેવીસુતસ્ત્રિવિત્  ॥ ૭૩॥

યોગીશ ઋષભઃ સ્થાણુર્યોગચર્યાપ્રવર્ત્તકઃ ।
પૃથુઃ પૃથુમનાઃ પૃથ્વીપાલકો જગતઃ પિતા ॥ ૭૪॥

મત્સ્યઃ સત્યવ્રતાનન્દઃ કચ્છપો મેરુભૃત્સમઃ ।

ધન્વન્તરિઃ સુધાહસ્તો જનરોગાપવર્ગદઃ ॥ ૭૫॥

મોહિની મોહનો માયી દનુજક્લેશદઃ પવિઃ ।
નરસિંહો મહાસિંહો પ્રહ્લાદો દિતિજાર્દનઃ ॥ ૭૬॥

ઉગ્રો વીરો નિજાનન્દો ભીષણાર્ત્તિહરઃ પવિઃ ।
ઉરુક્રમઃ કર્મગત ઇન્દ્રસેનાભયપ્રદઃ ॥ ૭૭॥

રામઃ પરશુભૃદ્ દુષ્ટક્ષત્રહારી દ્વિજાર્ત્તિહા ।
પારાશર્યો મહાભાગો હ્યનુકમ્પ્યનુભાવવિત્ ॥ ૭૮॥

જ્ઞાનાવતારો વિજ્ઞાતા વૈષ્ણવોઽસુરમોહનઃ ।
શ્રીરામચન્દ્રો રઘુજઃ સાક્ષાદ્બ્રહ્મમયો હરિઃ ॥ ૭૯॥

જગત્સન્તાપહરણો બ્રહ્મણ્યઃ સત્યવત્સલઃ ।
સત્યસન્ધઃ શરણ્યશ્ચ મર્યાદાપુરુષોત્તમઃ ॥ ૮૦॥

કૌસલ્યાનન્દનો દેવદત્તો ભરતવલ્લભઃ ।
લક્ષ્મણપ્રાણદઃ પ્રાણઃ શત્રુઘ્નઃ શત્રુતાપનઃ ॥ ૮૧॥

વિશ્વામિત્રપ્રિયો દાન્તઃ શાન્તો દશરથાત્મજઃ ।
સીતાપતિઃ પુણ્યકીર્ત્તિર્હરકોદણ્ડભઞ્જનઃ ॥ ૮૨॥

સત્યવાક્ પિતૃસદ્ભક્તિર્માર્ગનેતા નરોત્તમઃ ।
નિઃસ્પૃહો નિર્મમો નિત્યો નિર્મોહશ્ચ નિરઞ્જનઃ ॥ ૮૩॥

ચિત્રાદ્રિરમણઃ કાકભિદ્ આદિમુનિપ્રિયઃ ।
ગુહસ્વામી ગુહાનન્દી દણ્ડકારણ્યપાવનઃ ॥ ૮૪॥

દુષ્ટાદાનવહન્તા ચ સ્વજનાનન્દનક્રિયઃ ।
શબરીશુદ્ધિદઃ સીતાવિયોગગતિનાટ્યકૃત્ ॥ ૮૫॥

જટાયુમુક્તિદો વાયુસુતાદિકપિવલ્લભઃ ।
સેતુબન્ધનકૃન્નામશક્તિસમ્ભૃતભૂધરઃ ॥ ૮૬॥

લઙ્કાધિપકુલધ્વંસી વિભીષણવરપ્રદઃ ।
અયોધ્યાનાયકશ્ચૈકક્રિયારમણસદ્વ્રતઃ ॥ ૮૭॥

યજ્ઞકૃદૃષિસમ્માન્યો રાજર્ષિઃ સર્વવલ્લભઃ ।
શિવાદિવન્દિતપદો નટનાટ્યો નરાકૃતિઃ ॥ ૮૮॥

અયોધ્યાતારકસ્તારઃ પુણ્યશ્લોકશિખામણિઃ ।
વાસુદેવો મહાદેવો બલભદ્રોઽસુરૌઘહા ॥ ૮૯॥

ભૂભારહરણો હારી ત્રિલોકપરિપાલકઃ ।
વૃન્દારકાનુગો વિઙ્ગોઽસુરમોહનતત્પરઃ ॥ ૯૦॥

બુદ્ધો બુદ્ધિપ્રદોઽશુદ્ધમાર્ગકૃદ્વેદધર્મહા ।
અહિંસાવ્યાજસન્તપ્તઃ સર્વધર્મકૃતાગમઃ ॥ ૯૧॥

કલિધર્માકુલો જગત્પાલકો પાલનક્ષમઃ ।
સન્ધિધર્મધરો ધુર્યો હ્યસન્માર્ગવિનાશકઃ ॥ ૯૨॥

સદ્યુક્તિઃ સત્કૃતિઃ સાધુર્મુનિરૂપઃ કૃતાવનઃ ।
ઉપધર્મહરો વિદ્વાન્ ધર્મદણ્ડધરો હરઃ ॥ ૯૩॥

જગજ્જેતા જગન્નેતા સર્વધર્મપ્રવર્ત્તકઃ ।
તામસસ્તામસજનદુષ્ટબુદ્ધિપ્રદો મદી ॥ ૯૪॥

બહુધોપાસનામાર્ગો વિરક્તોઽવનિમણ્ડનઃ ।
નિઃસાધનજનોદ્ધારી કરુણાવરુણાલયઃ ॥ ૯૫॥

વાક્પતિઃ શ્રીધરો ધીરો માધવશ્ચ સનાતનઃ ।
વિષ્ણુઃ કલિમલધ્વંસી જાહ્નવીજલસંશ્રિતઃ ॥ ૯૬॥

મહાકલિઃ કલિઃ ક્લિષ્ટઃ કલ્કિઃ કલિનિવારણઃ ।
મ્લેચ્છહાઽસિધરો લીલાયુતસ્તુરગવાહનઃ ॥ ૯૭॥

ઈશલીલાધરઃ સૂર્યઃ શ્રદ્ધાલુઃ શ્રાદ્ધભુક્ શુભઃ ।
ઇક્ષ્વાકુઃ પુરુજિચ્ચન્દ્રોઽમ્બરીષોઽપ્યમિતદ્યુતિઃ ॥ ૯૮॥

નિમિર્નિમેષગઃ સત્યો યૌવનાશ્વો મહાબલી ।
સગરઃ સાગરો યોગી જેતા ભાગીરથોઽરિહા ॥ ૯૯॥

ખટ્વાઙ્ગો મુચુકુન્દશ્ચ રઘુર્દશરથો દ્યુમાન્ ।
ચન્દ્રો દ્વિજેશો સુદ્યુમ્ન ઐલશ્ચ નહુષો નૃપઃ ॥ ૧૦૦॥

યયાતિશ્ચ યદુત્રાતા કુરુશ્ચ ભરતો વૃષઃ ।
કાર્તવીર્યો મહાવીર્યો વિશ્વામિત્રોઽપિ શન્તનુઃ ॥ ૧૦૧॥

ભીષ્મઃ પાણ્ડુસુતઃ શૈબ્યોઽલર્કોઽયોધ્યાપતિસ્ત્રિપાત્ ।
દિવોદાસો રન્તિદેવો વિષ્ણુદત્તો નરેશ્વરઃ ॥ ૧૦૨॥

સદ્ધર્મરક્ષણકૃતી નિરોધગતિદોઽમૃતઃ ।
જગતામાશ્રયો નિત્યો લોકાતીતો  મહોદયઃ ॥ ૧૦૩॥

વેદૈકવેદ્યો વેદાત્મા વેદાનુગ્રહકૃત્પ્રભુઃ ।
વ્યાપી  વૈકુણ્ઠનિલયો નિજલીલારતિપ્રિયઃ ॥ ૧૦૪॥

અવતારિતભક્તાંશઃ સમુદ્ધારત્વરાકૃતિઃ ।
દિવ્યૈકનિલયો દિવ્યો દિવ્યક્રીડારસોઽરસઃ ॥ ૧૦૫॥

નન્દો નન્દયિતાઽઽનન્દી યશોદાનન્દમન્દિરઃ ।
વ્રજેશ્વરો વ્રજાધ્યક્ષો વ્રજવૈભવકારકઃ ॥ ૧૦૬॥

અસુરમાયાહૃદ્યોગમાયાજનકકાર્યકૃત્ ।
પૂર્ણબ્રહ્મ પરાનન્દમાત્રગાત્રોઽવિચિન્તનઃ ॥ ૧૦૭॥

પરિપૂર્ણકલાસ્વામી સહસ્રસુકલાધરઃ ।
ભૂભક્તપ્રાર્થિતપ્રાપ્યો ભૂભારહરણોદિતઃ ॥ ૧૦૮॥

બ્રહ્મેશેન્દ્રાદિદેવેડ્યઃ પુરુષઃ પુરુષોત્તમઃ ।
અસુરૈ રણકૃત્ત્રાતા માયેશો મોહકાર્યકૃત્ ॥ ૧૦૯॥

વસુદેવઃ સત્ત્વમૂર્તિર્દેવધાનીનિવાસકૃત્ ।
બ્રહ્માદિસંસ્તુતો દેવો વાસુદેવશ્ચતુર્ભુજઃ ॥ ૧૧૦॥

વ્યાખ્યાતાશેષમાહાત્મ્યઃ ગોકુલાનન્દકારકઃ ।
સ્વવ્યૂહસંહરઃ સારઃ પ્રયાગચરિતવ્રતઃ ॥ ૧૧૧॥

સ્વકીયજનવિજ્ઞાતઃ સ્વપ્રિયો જનરઞ્જનઃ ।
મહાનન્દકરોઽમન્દગુણોદારો મહોત્સવઃ ॥ ૧૧૨
ગોગોપજનતાનન્દઃ પૂતનાપ્રાણહારકઃ ।
પૂતનાસુપયઃપાનપ્રોદ્ધૃતસ્વીયબાલકઃ ॥ ૧૧૩॥

મૂલાવિદ્યાહરઃ સ્વીયચિત્તરોધનપણ્ડિતઃ ।
શકટાસુરસંહારી સ્વીયદોષનિવારકઃ ॥ ૧૧૪॥

પવનાસુરભિદ્ભીષ્મઃ મુરારિઃ સુતલાર્દનઃ ।
ગોસ્વામી ગોકુલપતિર્ગોવિન્દો નન્દલાલિતઃ ॥ ૧૧૫॥

ગોપાલો ગોકુલાધીશો નવનીતપ્રિયઃ પ્રભુઃ ।

દામોદરો ભક્તવશ્યો યમલાર્જુનમુક્તિદઃ ॥ ૧૧૬॥

અપ્રમેયઃ પ્રમેયાત્મા બલદમ્ભવિમર્દનઃ ।
કાલિયાસુરહરઃ ક્રોધદણ્ડનો મણ્ડનઃ સતામ્ ॥ ૧૧૭॥

પ્રાણપાલો દિવ્યજન્મા લીલાતાણ્ડવપણ્ડિતઃ ।
વૃન્દાવનચરઃ કાન્તો મલ્લો નટસમામ્બરઃ ॥ ૧૧૮॥

બર્હાપીડઃ પીતવાસા સૂર્યભૂષણભૂષણઃ ।
મુરલિનાદમાધુર્યસમાહૂતવ્રજાઙ્ગનઃ ॥ ૧૧૯॥

યોગમાયાવિરચિતસર્વસેવાકૃતાર્થનઃ ।
લાવણ્યૈકપરામૂર્ત્તિર્વૃન્દારણ્યપુરન્દરઃ ॥ ૧૨૦॥

પરમાપીચ્યો ગોપીડ્યો વિયોગહૃતબન્ધનઃ ।
સઙ્ગપ્રાપ્તાન્યમહિલામોહવાન્ વદતાં વરઃ ॥ ૧૨૧॥

સ્વકીયારતિદઃ કામી કામશાસ્ત્રવિશારદઃ ।
પુરન્ધ્રીદોષહરણઃ સ્વાત્મમાયાપ્રદર્શકઃ ॥ ૧૨૨॥

ગોપિકાગીતમહિમા સ્વદોષપરિબોધકઃ ।
શ્રીગોકુલપતિઃ સાક્ષી કોટિમન્મથમન્મથઃ ॥ ૧૨૩॥

ભક્તોત્તમર્ણઃ સઙ્કીર્ણઃ સર્વાનન્દકરો ગુરુઃ ।
નૃત્યલીલાનુકરણસ્ત્રિભઙ્ગલલિતાકૃતિઃ ॥ ૧૨૪॥

પરમાનન્દવિસ્તારો વિસ્માપિતસુરેશ્વરઃ ।
સર્વસૌભાગ્યસુફલઃ કામદોષનિવારકઃ ॥ ૧૨૫॥

અલૌકિકગતિઃ શઙ્ખાસુરચૂડામણિપ્રદઃ ।
પ્રેમાત્મકો રુક્મમૂર્તિઃ પરાશ્રયનિવારકઃ ॥ ૧૨૬॥

કેશિહા વૃષહા ચૈવ નારદેડ્યો નૃપેશ્વરઃ ।
અક્રૂરવલ્લભો ભૂમિભારહા યાદવેશ્વરઃ ॥ ૧૨૭॥

કંસારિર્દુષ્ટદમનો વ્રતી ગુરુવરાદૃતઃ ।
જરાસન્ધવધોદ્દામી યવનાન્તકરો રવિઃ ॥ ૧૨૮॥

મુચુકુન્દપ્રિયઃ શ્રીશો દ્વારકાસૌભગોદયઃ ।
રુક્મિણીશઃ સ્મરકરઃ પ્રદ્યુમ્નો રતિવલ્લભઃ ॥ ૧૨૯॥

સત્યભામાપતિર્જામ્બવતીશો લક્ષ્મણાપતિઃ ।
ભદ્રાપતિર્મિત્રવિન્દાપતિઃ શૈબ્યાપતિર્મખી ॥ ૧૩૦॥

કાલિન્દિનીધવો ધાતા શતસ્ત્રીનાયકો યુવા ।
ષોડશસ્ત્રીસહસ્રેશઃ સત્ત્વસૃષ્ટિપરાયણઃ ॥ ૧૩૧॥

પાણ્ડવાનન્દકરણઃ કૌરવાન્વયનાશનઃ ।
ભૂભારભૂતરાજન્યદૈત્યસઙ્ઘવિનાશકઃ ॥ ૧૩૨॥

સુદામાભ્યર્થિતઃ પ્રાપ્તશ્રુતદેવો નિમિપ્રિયઃ ।
ષડ્ગુણૈશ્વર્યસમ્પન્નો નિજભક્તાનુરોધકૃત્ ॥ ૧૩૩॥

જ્ઞાનગમ્યઃ સાઙ્ખ્યગમ્યો ભક્તિવશ્યઃ કૃતાગમઃ ।
સ્વરૂપાનન્દરમણઃ સ્વાશ્રયો નિરપાશ્રયઃ ॥ ૧૩૪॥

યોગીશ્વરૈર્વન્દિતાઙ્ઘ્રિર્દેવાનન્દકરઃ પ્રભુઃ ।
શેષભૂતસમસ્તાત્મા પરાનન્દમિતો હરિઃ ॥ ૧૩૫॥

ફલશ્રુતિઃ ।

ઇતિ શ્રીગોકુલેશસ્ય પ્રોક્તં નામસહસ્રકમ્ ।
પઠનાદ્ભાવવિજ્ઞાનાં ભજનાનન્દદાયકમ્ ॥ ૧૩૬॥

શ્રીમદાર્યપ્રસાદેન પ્રાપ્ય શ્રીશમહામનુમ્ ।
સમર્ચ્ય સમ્પઠેદ્ભક્ત્યા નિગ્રહાનુગ્રહક્ષમઃ ॥ ૧૩૭॥

ભવેત્ પૂજ્યશ્ચ મહતાં વિદ્યાનાં પારદૃશ્વનઃ ।
સર્વાપરાધૈર્મુચ્યેત પરચર્યાસુ સઙ્ગતૈઃ ॥ ૧૩૮॥

ભક્તિબીજમવાપ્નોતિ પ્રાપ્નોતિ ચ દૃઢાં શ્રિયમ્ ।
બ્રાહ્મણો વેદવેદાન્તસદાચારફલં લભેત્ ॥ ૧૩૯॥

ક્ષત્રિયો વિજયી ભક્તવત્સલો બ્રાહ્મણપ્રિયઃ ।
વૈશ્યો વિત્તપતિર્ભવ્યો દાતા ભોક્તા ભવેદયમ્ ॥ ૧૪૦॥

શૂદ્રઃ શુદ્ધો ભવેદસ્માદ્ બ્રહ્મણ્યો હરિવલ્લભઃ ।
ભક્તો ભક્તિં સમાપ્નોતિ કામી કામાન્ મનોગતાન્ ॥ ૧૪૧॥

રોગાર્તો મુચ્યતે રોગાદ્ બદ્ધો મુચ્યેત બન્ધનાત્ ।
આપન્નશ્ચાપદો મુચ્યેદ્ મુમુક્ષુર્મુચ્યતે ભયાત્ ॥ ૧૪૨॥

સર્વાત્મનેહ ગદિતઃ શ્રીલીલાપુરુષોત્તમઃ ।

સર્વાત્મભાવલબ્ધ્યર્થં કામભાવાપ્તયેઽપિ ચ ॥ ૧૪૩॥

નાનેન સદૃશં કિઞ્ચિત્ શ્રીપતેરતિવલ્લભમ્ ।
તસ્માદવશ્યમભ્યસ્યં વૈષ્ણવૈઃ પૂજને હરેઃ ॥ ૧૪૪॥

વૃન્દાવને વટપ્રાન્તે તીર્થસ્થાને ગુરોર્ગૃહે ।
અભ્યસ્ય સમવાપ્નોતિ યજમાનસ્ય બન્ધુતામ્ ॥ ૧૪૫॥

પરકૃત્યાસુ ઘોરાસુ પ્રેતાદીનામુપદ્રવે ।
તીર્થામધુસરૈઃ (?) પાઠ્યં તત્તન્નાશયતે ક્ષણાત્ ॥ ૧૪૬॥

પાષણ્ડાનાં પ્રસઙ્ગેન યે યે દોષા ભવન્તિ વૈ ।
તે સર્વે નાશમાયાન્તિ સકૃદાવર્ત્તનાદપિ ॥ ૧૪૭॥

એતેન મન્ત્રિતં ભસ્મ અગ્નિહોત્રાદિજં શુભમ્ ।
વિલિપ્ય ઘોરબાધાસુ તત્ક્ષણાદુપસંહરેત્ ॥ ૧૪૮॥

ન વાઞ્છન્તિ ચ યે કામાન્ તેષાં કામાઃ સ્વસંસ્થિતાઃ ।
અનુગ્રહાદ્ભગવતઃ શ્રીગોપાલસ્ય તે પ્રિયાઃ ॥ ૧૪૯॥

ઇતિ શ્રીશાણ્ડિલ્યસંહિતાયાં પઞ્ચમે ભક્તિખણ્ડે પ્રથમાંશે
વિંશતિતમેઽધ્યાયે ગોપાલદિવ્યસહસ્રનામવર્ણનં સમ્પૂર્ણમ્ ।

Proofread by Manish Gavkar, Rajani Arjun Shankar

*Gopala Divya Sahasranama Stotram*

pdf was typeset on March 23, 2024

Please send corrections to *sanskrit@cheerful.com*